# Shri Nrisimha Dhyanashlokah

# શ્રીનૃસિંહધ્યાનશ્લોકાઃ

## Document Information

Text title : Shri Nrisimha Dhyanashlokah

File name : nRRisiMhadhyAnashlokAH.itx

Category : vishhnu, dashAvatAra, dhyAnam

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# Shri Nrisimha Dhyanashlokah

# શ્રીનૃસિંહધ્યાનશ્લોકાઃ

ગોખણ્ડં વારુણાણ્ડં પરિ વિટિ વિટિત દર્પણાણ્ડં મૃણાણ્ડમ્ ।
ડીણ્ડીંશ્ચ ડીણ્ડીં ડહમપિ ડહ મૈઃ ઝુમ્પ્ર ઝુમ્પ્રૈશ્ચ ઝુમ્પ્રૈઃ
સ્તૈલ્યાસ્તૈલ્યાસ્તુ સ્તૈલ્યાઃ કુકુકુકુકક્કુમાં કુક્કુમાં કુક્કુમાક્કું
એતત્તે પાદપદ્મં વહતુ ગહતુ માં પાતુ માં નારસિંહઃ ॥

સત્યજ્ઞાનસુખસ્વરૂપમમલં ક્ષીરાબ્ધિમધ્યે સ્થિતં
યોગારૂઢમતિપ્રસન્નવદનં ભૂષાસહસ્રોજ્જ્વલમ્ ।
ત્ર્યક્ષં ચક્રપિનાકસાભયકરાન્ બિભ્રાણમર્કચ્છવિં
છત્રીભૂતફણીન્દ્રમિન્દુધવલં લક્ષ્મીનૃસિંહં ભજે ॥ ૧॥

ઉપાસ્મહે નૃસિંહાખ્યં બ્રહ્મવેદાન્તગોચરમ્ ।
ભૂયોલાલિતસંસારચ્છેદહેતું જગદ્ગુરુમ્ ॥ ૨॥

કોપાદાલોલજિહ્વં વિવૃતનિજમુખં સોમસૂર્યાગ્નિનેત્રં
પાદાદાનાભિરક્તપ્રભમુપરિસિતં ભિન્નદૈત્યેન્દ્રગાત્રમ્ ।
શઙ્ખશ્ચક્રશ્ચ પાશાઙ્કુશકુલિશગદાદારુણાન્ યુદ્ધહન્તં
ભીમં તીક્ષ્ણાગ્રદંષ્ટ્રં મણિમયવિવિધાકલ્પમીડે નૃસિંહમ્ ॥ ૩॥

ગર્જન્તં ગર્જયન્તં નિજભુજપટલં સ્ફોટયન્તં હરન્તં
રૂપ્યન્તં તાપયન્તં દિવિભુવિ દિતિજં ક્ષેપયન્તં શિરોઽન્તમ્ ।
ક્રન્દન્તં રોષયન્તં દિશિ દિશિ સતતં સરભન્તં હરન્તં
વીક્ષન્તં ઘૂર્ણયન્તં કરનિકરશતૈર્દિવ્યસિંહં નમામિ ॥ ૪॥

માણિક્યાદિસમપ્રભં નિજરુચા સન્ત્રસ્તરક્ષોગણં
જાનુન્યસ્તકરામ્બુજં ત્રિનયનં રત્નોલ્લસદ્ભૂષણમ્ ।
બાહુભ્યાં ધૃતશઙ્ખચક્રમનિશં દંષ્ટ્રાગ્રવક્ત્રોલ્લસ-
જ્જ્વાલાજિહ્વમુદગ્રકેશનિચયં વન્દે નૃસિંહં વિભુમ્ ॥ ૫॥

ક્ષીરાબ્ધૌ વસુમુખ્યદેવનિકરૈરગ્રાદિસંવેષ્ટિતઃ

શઙ્ખં ચક્રગદામ્બુજં નિજકરૈર્બિભ્રંસ્ત્રિનેત્રઃ સિતઃ
સર્પાધીશફણાતપત્રલસિતઃ પીતામ્બરાલઙ્કૃતો
લક્ષ્મ્યાશ્લિષ્ટકલેવરો નરહરિ સ્તન્નીલકણ્ઠો મુદે ॥ ૬॥

ઉદયરવિસહસ્રદ્યોતિતં રૂક્ષવીક્ષં
પ્રલયજલધિનાદં કલ્પકૃદ્વહ્નિવક્ત્રમ્ ।
સુરપતિરિપુવક્ષચ્છેદરક્તોક્ષિતાઙ્ગં
પ્રણતભયહરં તં નારસિંહં નમામિ ॥ ૭॥

ઊર્ધ્વાભ્યામાન્ત્રમલે તદનુદરમરિં ખડ્ગખેટૌ વહન્તં
ચાપં બાણં દધાનં મુસલમપિ ગદાં પાશમપ્યઙ્કુશં ચ
ઊર્વૌ નિક્ષિપ્ય દૈત્યં તદુદરકુહરં દારયન્તં ચ દોર્ભ્યાં
રક્તજ્જ્વાલા-વમન્તં જ્વરભયસમયે ચિન્તયેદુગ્રસિંહમ્ ॥ ૮॥

લક્ષ્મીશોભિતવામભાગમમલં સિંહાસને સુન્દરં
સવ્યે ચક્રધરં ચ નિર્ભયકરં વામેન ચાપં વરમ્ ।
સર્પાધીશકૃતાન્તપત્રમમલં શ્રીવત્સવક્ષસ્થલં
વન્દે દેવમુનીન્દ્રવન્દિતપદં લક્ષ્મીનૃસિંહં વિભુમ્ ॥ ૯॥

ઉગ્રં તં નારસિંહં વિવૃતભયમુખં રક્તનેત્રાધરોષ્ઠં
તેજોભિઃ પ્રજ્વલન્તં હુતવહસદૃશં દુર્નિરીક્ષ્યં સુરેન્દ્રૈઃ ।
ભિન્નૌ દિવ્યૈર્નખાગ્રૈર્ગજમદમલિનૈર્દાનવેન્દ્રો હિરણ્યઃ ।
સોઽયં નઃ પાતુ નિત્યં ત્રિભુવનવિજયી સિંહરૂપેણ વિષ્ણુઃ ॥ ૧૦॥

અરુણકનકવર્ણં નીલકણ્ઠં ત્રિનેત્રં
રથચરણપિનાકાભીત્યભીષ્ટાગ્રહસ્તમ્ ।
અમૃતલહરિગૌરં શેષભોગે શયાનં
પ્રણમતશશિચૂડં યોગરૂઢં નૃસિંહમ્ ॥ ૧૧॥

નમન

નમોઽસ્તુ નારાયણ નારસિંહ નમોઽસ્તુ નારાયણ વીરસિંહ ।
નમોઽસ્તુ નારાયણ ક્રૂરસિંહ નમોઽસ્તુ નારાયણ દિવ્યસિંહ ॥

નમોઽસ્તુ નારાયણ વ્યાઘ્રસિંહ નમોઽસ્તુ નારાયણ પુચ્છસિંહ ।
નમોઽસ્તુ નારાયણ પૂર્ણસિંહ નમોઽસ્તુ નારાયણ રૌદ્રસિંહ ।
નમો નમો ભીષણ ભદ્રસિંહ નમો નમો વિહ્વલનેત્રસિંહ ।
નમો નમો બૃંહિતભૂતસિંહ નમો નમો નિર્મલચિત્રસિંહ ॥

નમો નમો નિર્જિતકાલસિંહ નમો નમઃ કલ્પિતકલ્પસિંહ ।
નમો નમઃ કામદ કામસિંહ નમો નમસ્તે ભુવનૈકસિંહ ।
નમો નમસ્તે જયસિંહરૂપ નમો નમસ્તે નરસિંહરૂપ ।
નમો નમસ્તે રણસિંહરૂપ નમો નમસ્તે નરસિંહરૂપ ।

ઇતિ શ્રીનૃસિંહધ્યાનશ્લોકાઃ સમ્પૂર્ણા ।

Proofread by M K Barman

---

*Shri Nrisimha Dhyanashlokah*
pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*